**आम्ला** स्त्री॰ सम्यक् अम्लो रसो यस्याः । १तिन्तिड्याम् (तेतुल) स्वार्थे कनि आम्लिकाप्यत्र । २अम्लरसयुक्ते त्रि॰। मनोज्ञा॰भावे वुञ् आम्लिका । २अम्लरसे ३अ-म्लोद्गारे च शब्दमाला । अम्लरसोऽस्त्यस्य अण् ङीप् । आम्लीत्यपि तिन्तिड्याम् ।

**आय** पु॰ आ–इण–अच् अय–घञ् वा । १लाभे २प्राप्तौ, "आयव्ययविशोधितात्" स्मृतिः आयव्ययौ च नियता-वाकरान् कोषमेव च" मनुः। ३धनागमे, ज्योतिषोक्ते लग्नावधिके राश्यवधिके च ४एकादशस्थाने, ४वनितागार-पालके च कर्मणि अच् घञ् वा । ग्रामादितः स्वामिग्रा-ह्यभागे,लभ्ये ५धनादौ "तदस्मिन् वृद्ध्यायलाभोपदा दीयते" पा॰ ग्रामेषु स्वामिग्राह्योभाग आयः" सि॰ कौ॰ लग्नायधिकैकादशस्थानस्यायत्वं च तत्-स्थाने आयस्य चिन्तनीयत्वात् । तत्र वर्षलग्नावधि-कैकादशस्थाने ग्रहविशेषयोगादिभिरायोपायविवेकः । नीलकण्ठता॰ "अल्पे त्रेऽथगे लाभो वाणिज्यात् शुभदृग्युते । शेन्थिहेऽस्मिन् लग्नगे तु लाभः पठ-नलेखनात् । अस्मिन् षष्ठाष्टान्त्यगते सक्रूरे नीचकर्मतः । क्रूरेक्षणेन लाभोऽस्तंगतेन लिखनादिभिः । जीवेऽब्दपे क्रूरहते लग्ने हानिर्न्टपाद्भयम् । अस्मिन्नधिकृते द्यूने व्यवहाराद्धनाप्तयः। लग्नाधिपेनेत्थशाले लाभः स्वजनगौ-रवम् । सर्वेऽपि लाभे वित्ताप्त्यै सबला निर्बला न तु । सवीर्यौच्चः समुथहोलग्ने ऽर्थसहमे शुभम् । ददाति खात-द्रव्यस्य लाभः पापदृशा न तु"। आयसहमन्तु सहमशब्दे वक्ष्य-ते आयभावानयनञ्च ५१८पृष्ठे अष्टमभावशब्दोक्तदिशावसे-यम्। जन्मग्नावधिकैकादशस्थाने ग्रहस्थित्यादिभिरायविवेकः जातकप॰उक्तः यथा"स्वामिसदृग्ग्रहयुतेक्षित आये सर्वलाभ सहितः शुभवर्गे । क्रूरदृष्टिसहिते खलवर्गे नो शुभं खल-शुभे च विमिश्रम्।सर्व खेचरयुतं त्वथ दृष्टं लाभमब्धकुल-लाभकरन्तु । तत्र यो बलयुतो निजदृष्ट्या खं धनं दिशति सम्यगतुच्छम् । उच्चे स्वमित्रगेहगोवलवांस्च पूर्णं, शत्रोर्गृहे तु खचरस्वरणं ददाति । नीचारिभांशकगतोऽर्द्धफलप्रदः स्यादस्तंगतोऽल्पकफलः खलु लाभभावे । लाभभे रवि-युतीक्षणवर्गैः संयुते न्टपचतुष्पदचौर्य्यैः । युद्धतोऽपि हि धनं विधुजैस्तैस्तोयदन्तियुवतिप्रभवं स्यात् । लाभे कुजे-क्षितयुते कुजवर्गयुक्ते वित्तं प्रवालमणिभूषणकाञ्चनाढ्यम् । स्यात् साहसैश्च गमनागमनैस्तथाग्निशस्त्रप्रपञ्चजनितैर्वच-नान्मुनीनाम्। बुधदृष्टेऽथ वा युक्ते लाभे बुधगणेऽपि वा । वित्तं लिखनशिल्पाद्यैरङ्गवेसरकाव्यजम् । आये दृष्ट-स्तथायुतीक्षणवर्गयुते यज्ञादिहेमसुतविक्रमनागरैः स्वम् । शौक्रे क्षणे गणयुते गमनाङ्गनाभ्योवाराङ्गनारजतपत्नसयं धनं स्यात् । शनियुक्ते लाभगृहे शनिदृष्टे शनेर्गणे । महिषी लोहकृष्यं धनं स्थावरकर्मभिः । निजाब्दकेऽर्कः प्रचु-रार्थलाभं लक्ष्मीं कुजोऽजस्र धनं न्टपाब्दे । ज्ञः पञ्चवेदे धनमिन्द्रपूज्यो लक्ष्मीं सितोऽर्कं कुजवच्छनिस्तु" । राश्य-वधिकैकादस्थाने च गोचरे सर्वे ग्रहाः शुभाः "सर्वेऽप्यु-पान्त्ये शुभाः"इत्युक्तेः अत्र विशेषो गोचरशब्दे वक्ष्यते ।

**आयःशूलिक** त्रि॰ अयःशूलेनार्थान् अन्विच्छति+अयः शूल+ठक् । "तीक्ष्णोपायेन योऽन्विच्छेत् स आयःशूलिको जन" इत्युक्ते तीक्ष्णकर्मणार्थकरे ।

**आयजि** त्रि॰ आभिमुख्येन इज्यते आ+यज–कर्मणि–इन् । १आभिमुख्येन इज्यमाने "आयजे ! त्वामनवे जातवेदसम्" ऋ॰ ८,२३,१७ भावे इन् । २आभिमुख्येन यागे ।

**आयज्यु** त्रि॰ आत्मन आयजिमिच्छति क्यच् उण् नि॰ इलोपः।आभिमुख्येन यागमिच्छति।"आयज्यवःसुमतिं विश्ववाराः" ऋ॰ ६,२७,२६ ।

**आयत** त्रि॰आ+यम–क्त । १दीर्घे आयामयुक्ते "धनुरायत भोगवासुकिज्या" किरा॰। आ+यम–अन्तर्भूतण्यर्थे कर्मणि क्त । २आकृष्टे "आरचितानायतबलगबन्धैः" माघः । "आयता आकृष्टा बल्गावन्धायैः" मल्लि॰। ३दूरे च आकृष्टे "प्रजविभिरायतन्तुरङ्गैः" किरा॰ । "आयतं दूरमिति" मल्लि॰।"भूयसी तव यदायतायति"माघः ४नियमिते च । त्रिज मेदायतप्राणः" योगिया॰। प्राणनियमनञ्च यथेष्ट-प्राणवृत्तिनिरोधनम् । [त्रिका॰ ।

**आयतच्छदा** स्त्री आयतः दीर्घश्छदोऽस्याः । कदल्याम्

**आयतन** न॰ आयतन्तेऽत्र यत–आधारे ल्युट् । १देवादिव-न्दनस्थाने, २आश्रये, "स्नेहस्तदेकायतनं जगाम" कुमा॰ । "नरेन्द्रमूलायतना दनन्तरम्" रघुः । "रोगा-यतनमातुरम्" न जीर्णदेवायतने न बल्मीके कदाचन" "सीमासन्धिषु कार्याणि देवतायतनानि" इति च मनुः । ३विश्रामस्थाने ४यज्ञस्थाने च ।

**आयतस्तू** त्रि॰ आयतं स्तौति स्तु–क्विप् नि॰ दीर्घः । आ-यतस्तावके । "क्विब्वचिप्रच्छायतस्तूकटप्रुजूश्रीणां दीर्घो-ऽसम्प्रसारणञ्च" वार्त्ति॰।

**आयति(ती)** स्त्री॰आ+या–डति वा ङीप् । १उत्तरकाले आ-गामिकाले २प्रभावे कोषदण्डजे तेजसि ३फलदानकाले च ।